# Bharatam Tatam Numo Bharatam Tam Numah

# भारतं ततं नुमो भारतं तं नुमः

## Document Information

Text title : Bharatam Tatam Numo Bharatam Tam Numah

File name : bhArataMtataMnumobhArataMtaMnumaH.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Bharatam Tatam Numo Bharatam Tam Numah

# भारतं ततं नुमो भारतं तं नुमः

(गीति) (स्ग्विणी-वृत्तम्)
यत्र वेदध्वनि पापसंहारिणी
यत्र शास्त्रादि-चर्चा मनोमोहिनी ।
यत्र वेदान्त-विद्या सुधाधायिनी
भारतं तं नुमो भारतं तं नुमः ॥

यत्र सत्य शिव सुन्दर राजते
यत्र धर्मार्चना वीरपूजा सदा ।
यत्र विश्व कुटुम्ब मत श्रेयसे
भारतं तं नुमो भारतं तं नुमः
यत्र गङ्गा नदी, यत्र कालिन्दिका
यत्र गोदा च कृष्णा च कावेरिका ।
यत्र सिन्धुर्विपाशा शुभा नर्मदा
भारतं तं नुमो भारतं तं नुमः ॥

यत्र रामश्च कृष्णश्च विश्वात्मनौ
यत्र बुद्धो वसिष्ठश्च वल्मिकश्च ।
गौतमो जैमिनि श्रीकणादो मुनि
भारतं तं नुमो भारतं तं नुमः ॥

यत्र रामायणं च महाभारतं
दर्शनानां च योः यत्र ज्ञानामृतम् ॥

यत्र स्मृत्यादिकं धर्मशास्त्रोच्चयो-
भारतं तं नुमो भारतं तं नुमः ॥

यत्र सीता सती रामप्राणप्रिया
यत्र कृष्णप्रिया राधिका राजते ।
यत्र गार्गी च विद्योत्तमा राजते

भारतं तं नुमो भारतं तं नुमः ॥

यत्र व्यासो मुनि पाणिनि पिङ्गलः
कालिदास कविर्भारविर्भास्वरः ।
माघ-हर्षादयः काव्यकारोत्तमाः
भारतं तं नुमो भारतं तं नुमः ॥

यत्र कादम्बरी विज्ञ-चेतोहरी
मेघदूत मनोदूत-कान्त मतम् ।
गीतगोविन्दकं कृष्णलीलामृतमं
भारतं तं नुमो भारतं तं नुमः ॥

यत्र हैमो हिमाच्छादिनं पवतो
यत्र कश्मीर भू स्वर्ग शोभा-स्थली ।
विन्ध्यमालाऽवली-सत्पुडा-संहतिः
भारतं तं नुमो भारतं तं नुमः ॥

यत्र काशी पुरी ज्ञान विद्या-प्रदा
यत्र काञ्ची पुरी ज्ञान-गीताश्रया ।
यत्र वृन्दावनं कृष्णलीलाश्रमं
भारतं तं नुमो भारतं तं नुम ॥

यत्र तीर्थाधिपः सङ्गमो राजते
नेहरू-मालवीयो नृणामादृतौ ।
उत्तरः स प्रदेशो जनैर्गीयते
भारतं तं नुमो भारतं तं नुमः ॥

यत्र बौद्धा विहारा अशोको नृपो
ज्ञान-विद्या-स्थल या नालन्दकम् ।
स्तूप-चैत्यैर्विहारोऽस्ति ख्यातिं गतो
भारतं तं नुमो भारतं तं नुमः ॥

क्रान्तिदूतं सुभाषो वसुर्भासते
बंकिमो देशभक्तो रवीन्द्र कविः ।
रामकृष्णारविन्दादृता वङ्गभूः
भारतं तं नुमो भारतं तं नुमः ॥

नानको भक्तवर्यश्च शिष्याग्रणी,
यत्र गोविन्दसिंहश्च सिंहोपम ।
लाजपत्रार्चिता पुण्यपञ्चालभूः
भारतं तं नुमो भारतं तं  नुमः ॥

यत्र राणाप्रताप प्रतापाश्रयो
भक्त-मीरा सुवीरा प्रिया पद्मिनी ।
राजपुत्र-स्थली जैन-पूजा-स्थली
भारतं तं नुमो भारतं तं  नुमः ॥

यत्र गान्धिर्गुणाब्धि पटेल  सुधी,
धर्ममूर्तिदयानन्द-स्वामी स्थितः ।
सोमानाथान्वितो गुर्जरो राजते
भारतं तं नुमो भारतं तं  नुमः ॥

लौह-सयन्त्र-भूमिर्भिलाई-युतो
विक्रमेणाचितोऽवन्तिका-सङ्गत ।
मध्यदेशोऽत्र भोपाल-सिप्रान्तितो
भारतं तं नुमो भारतं तं  नुमः ॥

बालगङ्गाधरो यत्र ज्ञानेश्वर
सन्त-दास शिवाजी-शिवाराधित ।
यत्र मुम्बापुरी तन्महाराष्ट्रकं
भारतं तं नुमो भारतं तं  नुमः ॥

शकरो दिव्यधीर्यत्र रामानुज
सायणौ माधवौ यत्र रामेश्वरम् ।
यत्र कर्णाट-सङ्गीत-शोभा-स्थली
भारतं तं नुमो भारतं तं  नुमः ॥

यत्र क्रान्तेश्च शान्तेश्च दूता स्थिता,
ज्ञान विज्ञान-शोर्य-स्थलं गीयते ।
विश्वबन्धुत्व-शिक्षा-प्रसार-स्थलं
भारतं तं नुमो भारतं तं  नुमः ॥

Proofread by Mandar Mali

*Bharatam Tatam Numo Bharatam Tam Numah*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*